# संस्कृतवार्ता:

**दिनाङ्क :-29.03.2025**

**प्रात: - 06:55**

**अथ वार्ताः**

**प्रधानमन्त्री-टीवी9:**

प्रधानमन्त्रिणा नरेन्द्रमोदिना उक्तं यत् "इण्डिया फर्स्ट्" इति देशस्य विदेशनीतेः मन्त्रः जातः। सः अवदत् यत्, नवदिल्ली न केवलं विश्वव्यवस्थायां भागं गृह्णाति अपितु भविष्यस्य स्वरूपनिर्माणे, संरक्षणे चापि योगदानं ददाति। श्रीमोदी ह्यः नवदिल्ल्यां निजवार्ता प्रवाहिक्या आयोजितं कार्यक्रमं सम्बोधयन् आसीत्। प्रधानमन्त्रिणा उक्तं यत् भारतेन एकाधिकारस्य अपेक्षया मानवतायाः प्राथमिकता प्रदत्ता, सहभागितां सुनिश्चित्य एकविंशतिशतकस्य वैश्विकसंस्थायाः निर्माणस्य मार्गः प्रशस्तः अस्ति। सः अवदत् यत् अधुना भारतं केवलं स्वप्नराष्ट्रं नास्ति, अपितु कर्मराष्ट्रम् अपि अस्ति। अन्तर्राष्ट्रीयमुद्राकोषस्य प्रतिवेदनानि उद्धृत्य श्रीमोदी अवदत् यत् सम्प्रति विश्वं भारतं प्रति पश्यति, भारतं विश्वस्य एकमेव प्रमुखः अर्थव्यवस्था अस्ति यत् केवलं दशवर्षेषु एव सकलराष्ट्रीयउत्पादस्य द्विगुणीकरणं कृतवान्, भारते प्रायः पञ्चविंशति कोटियावत् जनाः दारिद्र्यात् बहिः समागताः। वैश्विक-समाव्हान् निवारणाय विश्वं एकत्रितं भवितव्यम् इति सः उल्लेखितवान्, येषु एकः ऊर्जा-संसाधनानां विषयः अस्ति। व्यापार असन्तुलनस्य रसदविषयाणां, वैश्विकसमाह्वानानां च विषये प्रवदन् श्रीमोदी भारत-मध्यपूर्व-यूरोप-आर्थिकविथ्या सह नूतनानां उपक्रमानाम् आरम्भाय विश्वेन सह भारतस्य सहकारिप्रयत्नान् प्रकाशितवान्।

**भारतीयसहायता - म्यांमार**

भारतेन ह्यः आगतस्य भूकम्पस्य अनन्तरं म्यान्मारदेशं प्रति प्रायः पञ्चदश टनमितं साहाय्योद्धार सामग्री प्रेषिता, भारतीयवायुसेनायाः सी-130जे इति विमानं हिण्डन् वायुसेनास्थानकात् सहायतां प्रेषितम्। साहाय्योद्धार सामग्रीषु अस्थाईनिवासं, शयनपुटं, कम्बलं, भोजनं, जनरेटर् सेट् इति विद्युदोत्पादन यन्त्रादीनि आवश्यकवस्तूनि च सन्ति। तदतिरिक्तं आपत्प्रभाविताना जनानां कृते महत्त्वपूर्ण-चिकित्सासामग्र्यः अपि प्रेष्यन्ते।

**मन्त्रिमण्डलस्य विवरणम्:**

देशे वैद्युतवस्तूनाम् निर्माणं वर्धयितुं वैद्युत-आपूर्ति-शृङ्खलां सुदृढां कर्तुं च सर्वकारेण वैद्युत-घटक-निर्माण-योजनायाः अनुमोदनं कृतम् अस्ति। ह्यः नवदिल्ल्यां वार्ताहरैः सह चर्चायां सूचनाप्रसारणमन्त्री अश्विनीवैष्णवः अवदत् यत्, विगतदशवर्षेषु वैद्युतकक्षेत्रे प्रचण्डवृद्धिः अभवत्। सः अवदत् यत् वैद्युतक-उत्पादनं सप्तदश प्रतिशतं प्रायः पञ्चगुणितं यावत् वर्धितास्ति तत्रैव वैद्युतकनिर्यातेषु अपि विंशतिः प्रतिशतं यावत् वृद्धिः अभवत्।

केन्द्रीयमन्त्रिमण्डलेन बिहारस्य कोसी मेची अन्तर्राज्य-योजन-परियोजनायाः प्रधानमन्त्री-कृषि-सिञ्चन-योजना-त्वरितसिञ्चन-लाभकार्यक्रमस्य अन्तर्गतं समावेशस्य अपि स्वीकृतिः प्रदत्ता। परियोजनायाः उद्देश्यं बिहारस्य अररिया, पूर्णिया, किशनगंज, कटिहारजनपदेषु दश सहस्राधिक् द्विलक्षं हेक्टेयरमितं अतिरिक्तं वार्षिकं सिञ्चनं प्रदातुं वर्तते।

## एशियायी-मल्लयुद्ध-प्रतिस्पर्धा

पञ्चविंशत्यधिक द्विसहस्रतम वर्षस्य एशियाई मल्लयुद्ध प्रतिस्पर्धायां भारतीयमल्लयुद्ध क्रीडिका मनीषा भानवाला एकविंशत्यधिक द्विसहस्रतम वर्षस्य संस्करणात् परं भारतस्य प्रथमं स्वर्णपदकं प्राप्तवती, तत्रैव अन्तिमपङ्घालः ह्यः जॉर्डनदेशस्य अम्माननगरे कांस्यपदकं विजितवान्।

## क्रिकेट-आईपीएलः

इण्डियन प्रीमियरलीग्-इत्यस्यां क्रिकेट् क्रीडा-मालिकायां चेन्नई-नगरस्य एम.ए.चिदम्बरम-क्रीडाङ्गणे गतरात्रौ रॉयल-चैलेन्जर्स्-बेङ्गलूरु-इत्यनेन दलेन चेन्नई-सुपर-किङ्ग्स्-इत्येतं दलं पञ्चाशत् धावनांकैः पराजितम्।

।।इति वार्ताः।।